International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 96-98
© 2026 IJMH
www.themultijournal.com

Received: 27-01-2026
Accepted: 11-02-2026
Publish : 12-02-2026

**स्वर्णाली पात्र**
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः

**Correspondence:**
**स्वर्णाली पात्र**
शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, अन्ध्रप्रदेशः

# सिद्धार्थचरितमहाकाव्ये गुणसमीक्षणम्

**स्वर्णाली पात्र**

अलङ्कारा: यथा काव्यस्य शोभावृद्धिं कुर्वन्ति तथैव गुणाः अपि काव्यस्य सौन्दर्यविधायकाः भवन्ति। आचार्यो दण्डी तु तस्य काव्यादर्शाख्यस्य अलङ्कारग्रन्थस्य प्रथमपरिच्छेदे दशप्रकारान् गुणान् प्रतिपादितवान्[1]। आचार्यस्य दण्डिनो मते काव्ये तु गुणस्य भूमिका एव प्रधानभूता भवति। आचार्यो वामनस्तु गुणानां स्थितिं शब्दार्थयोः समानरूपत्वेन स्वीकुर्वन् कथयति यत्, दशशब्दगताः गुणाः एवञ्च दशार्थगतगुणाश्च वर्तन्ते।[2] भोजस्तु स्वस्य सरस्वतीकण्ठाभरणे गुणनानां संख्यान्तु इतोऽपि अधिकामुक्तवान्। गच्छतः कालस्य परम्परायामुक्ता सर्वेऽपि गुणास्तु त्रीषु एव गुणेषु अन्तर्भाविताः मम्मटाचार्येण, ते च प्रसिद्धाः गुणाः भवन्ति– माधुर्य-ओजः-प्रसादाश्चेति।[3] मम्मटाचार्यस्य मते पूर्वोक्ताः ये गुणाः सन्ति, तेषु केचन तु एतेषु त्रिषु अन्तर्भूताः भवन्ति। केचन दोषाभावरूपत्वेन तिष्ठन्ति केचन तु गुणाः अभूत्वा दोषाः भवन्ति। तद्यथा द्रष्टुं शक्यते–

**केचिदन्तर्भवन्त्येषु दोषत्यागात्परश्रिताः।**
**अन्ये भजन्ति दोषत्वं कुत्र चिन्नततो दश॥**[4]

अनेन प्रकारेण वक्तुं शक्यते अस्माभिर्यत्- एते त्रयो गुणाः एव स्वीकर्तव्या इति।

❖ **माधुर्यगुणस्वरूपम्-**

काव्यप्रकाशे माधुर्यगुणस्य लक्षणमित्थं निगद्यते-

**आह्लादकत्वं माधुर्य्यं श्रृङ्गारे द्रुतिकारणम्**[5]

अर्थात् द्रुतिविशेषजनकत्वे सति आह्लादकत्वं माधुर्य्यस्य लक्षणं द्रुतिश्च चित्तस्य आर्द्रीभावः स च अग्निसंयोगात् लाक्षादेः गलितत्वमिव भवति। गुणस्य अस्य अवस्थितिः शृङ्गार-करुण-शान्तेषु रसत्रयेषु एव भवति। तत्रापि सम्भोगशृङ्गारे किंचित् न्यूनम्, करुणे ततोऽपि अधिकम्, विप्रलम्भशृङ्गारे ततोऽधिकं शान्तरसे च अतिशयं द्रुतिगलितत्वं दरीदृश्यते।

**करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम्॥**[6]

साहित्यदर्पणकारेणापि एतादृशम् एव उच्यते लक्षणम्-

**चित्तस्य द्रवीभावो ह्लादो माधुर्यमुच्यते॥**[7]

अस्य व्यञ्जकत्ववर्णविषये प्रोच्यते काव्यप्रकाशकारेण-

**मूर्ध्नि वर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू।**
**अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा॥**[8]

अर्थात् णकाररहितटवर्गवर्जिताः स्वस्ववर्गान्त्यवर्णयुक्ताः कादयोमावसानाः स्पर्शवर्णाः ह्रस्वस्वरान्तयुतौ रकारणकारौ चाल्पसमासयुक्ता मध्यमसमासयुक्ता वा माधुर्यवती रचना च माधुर्यगुणस्य व्यञ्जकाः भवन्ति। तथा च साहित्यदर्पणेऽपि प्रोच्यते

**मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडठान्विना।**
**रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः॥**
**अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा॥**[9]

तथा च सिद्धार्थचरितमहाकाव्ये माधुर्यगुणस्य योजना इत्थं दृश्यते-

**अस्ति प्रशस्ता कपिलेति नाम्ना काचित् पुरी कामदुधा प्रजानाम्।**
**यां वीक्ष्य शक्रो निजराजधान्याः श्लाघाभिसन्धिं शिथिलीकरोति॥**[10]

भगवतो बुद्धस्य वासभूमिः कपिलाख्या नगरी आसीत्। सा च नगरी प्रजानां सर्वदा इष्टप्रदा आसीत्। इमाञ्च पुरीं दृष्ट्वा देवराजः इन्द्रोऽपि स्वस्य राजधान्याः अमरवतीनगर्याः शोभां वर्णितुम् उत्साहमान्द्यम् आपादयति स्मेति तात्पर्यम्। अत्र स्वस्ववर्गान्त्यवर्ण-युक्तानां स्पर्श-वर्णानामल्पसमासयुक्तशब्दानां प्रयोगत्वात् माधुर्यगुणलक्षणं स्पष्टं प्रतिपद्यते।

**यो वाहिनीं मेघ इवात्तधन्वा विपक्षभूभृत्कटकप्रभूताम्।**
**आसारयन्नाकुलराजहंसां चक्रे समुच्चेलकबन्धनृत्ताम्॥**[11]

शुद्धोदनः गृहीतधन्वा सन् विरोधिनां राज्ञां सेनां दूरीकृतश्च सन् विरोधिभूतराजानं स्वायत्तीकृतवान् तथा स्वराज्यध्वजाम् अन्येषु राज्येषु प्रसारितवान् इति तात्पर्यम् अस्य श्लोकस्य।अत्रापि स्वस्ववर्गा-न्त्यवर्णयुक्तानां स्पर्शवर्णानाम् अल्पसमासयुक्तशब्दानां प्रयोगत्वात् माधुर्यगुणलक्षणं स्पष्टं प्रतिपद्यते।

❖ **ओजोगुणस्वरूपम्-**

मम्मटाचार्येण ओजोगुणविषये न्यगद्यत काव्यप्रकाशे-

**दीप्त्यात्मविस्तृतिहेतुरोजो वीररसस्थितिः**[12]

अर्थात् यः अन्तःकरणस्य दीप्तिरूपविस्तारस्य हेतुः वर्तते स एव ओजोगुणः। तस्य गुणस्य अवस्थितिः वीर-बीभत्स-रौद्ररसेषु च भवति। गुणः अयं वीररसे चित्तस्य अल्पविस्तारस्य हेतुः, बीभत्से ततः अधिकः प्रकर्षाधायकः, रौद्रे च ततोऽपि अधिकः प्रकर्षजनको भवति। प्रोच्यते च काव्यप्रकाशे-

**वीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण च**[13]

साहित्यदर्पणकारेण प्रोच्यते ओजोगुणविषये यथा-

**ओजोश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते।**[14]

अस्य व्यञ्जकाः वर्णाः इत्थं भवन्ति मम्मटाचार्यमते-

**योग आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः।**
**टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि॥**[15]

अर्थाद्वर्गस्थप्रथमो द्वितीयेन तृतीयश्चतुर्थेन संयुक्ताः वर्णाः, अधः उपरि वा रेफेण युक्तः, सदृशवर्णयोर्योगः, णकाररहितष्टवर्गः शकारषकारौ च वर्णाः, दीर्घसमासयुक्ताः, विकटरचनाश्चौजोगुणस्य व्यञ्जकाः भवन्ति। साहित्यदर्पणकारेणाप्यगादि-

**वर्गस्याद्यतृतीभ्यां युक्तौ वर्णौ तदन्तिमौ॥**
**उपर्यधो द्वयोर्वा सरेफष्टठडढैः सह।**
**शकारश्च षकारश्च तस्य व्यञ्जकतां गताः॥**
**तथा समासो बहुलो घटनौद्धत्यशालिनी।**[16]

तथा च सिद्धार्थचरितमहाकाव्ये-

**वेतण्डमण्डलविडम्बितचण्डवायुवेगावखण्डितकुलाचलगण्डशैलम्।**
**संवर्तसागरसमुद्गतभङ्गतुङ्गत्वङ्गत्तुरङ्गमतरङ्गितसर्वदिक्कम्॥**[17]

अस्मिन् श्लोके कामदेवस्य सेना राजसमूहेन तथा प्रलयकाले सागरात् समुच्छ्रिततरङ्गवत् अश्वेन व्याप्ता आसीत्। रथसमूहेन तथा धनुर्धा-रिभिः व्याप्ता आसीत् कामदेवस्य सेना।अत्र संयुक्तपरुषवर्णघटितबन्धेन ओजोगुणस्य अभिव्यक्तिः दृश्यते एव।

**आढौकमानरथमण्डलचक्रनेमिधाराविदारितधरातलसन्निवेशम्।**
**पादातपादपतनाशनिपाट्यमानपातालसन्तमससान्द्ररजोऽन्धकारम्॥**[18]

गच्छतः रथचक्रस्य नेमिधाराभिः विदारितधरातलसन्निवेशपदाति-सैन्यसमूह-पादाघातेन वज्रेण विदार्यमाणपातालसन्तमसनिविडरजो-ऽन्धकारमिव मारस्य चतुरङ्गबलं चचालेत्यस्य श्लोकस्य आशयः। अत्र संयुक्तपरुषवर्णघटितबन्धेन ओजोगुणस्य अभिव्यक्तिः स्पष्टा एव।

❖ **प्रसादगुणस्वरूपम्-**

प्रसादगुणविषये मम्मटाचार्यमतन्वित्थम्-

**शुष्केन्धनाग्निवत् स्वच्छजलवत्सहसैव यः।**
**व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः॥**[19]

अर्थात् लोके यथा अग्निः शुष्ककाष्ठं सहसा एव व्याप्नोति, जलञ्च यथा स्वच्छपटं व्याप्नोति तथैव यो गुणो व्याप्यचित्तं सहसा एव व्याप्नोति, स प्रसादगुणः। अथवा येन गुणेन रसाः सहसा एव चित्तं व्याप्नुवन्ति स प्रसादगुणः। गुणस्यास्य अवस्थितिः सर्वरसेषु भवति। साहित्यदर्पण-कारस्यापि समानमतिः-

**चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।**
**स प्रसादः समस्तेषु रसेषु रचनासु च॥**[20]

अस्य व्यञ्जकत्वविषये कथयति च काव्यप्रकाशकारः-

**श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्।**
**साधारणः समग्राणां वा प्रसादो गुणो मतः॥**[21]

अर्थात् येन शब्देनसमासेनरचनया वा श्रवणमात्रेण शब्दादभिधेय-प्रतीतिर्भवेत्, अपि च समस्तानां रसानां रचनानाञ्च साधारणधर्मः प्रासादगुणो भवति। एवमेव साहित्य-दर्पणेऽपि दृश्यते-

**शब्दास्तद्व्यञ्जका अर्थबोधका श्रुतिमात्रतः॥**[22]

तथा च सिद्धार्थचरितमहाकाव्ये-

**नदीव सिन्धोर्नलिनीव भानोः कलेव चेन्दोः कमलेव विष्णोः।**
**सौदामिनीवाम्बुधरस्य तस्य मायेति नाम्ना महिषी बभूव॥**[23]

आचार्यबुद्धघोषः शुद्धोदनस्य वर्णनान्तरं मायादेव्याः वर्णनं विधत्तेऽत्र। तथा च वक्ति- समुद्रस्य नदीसमाना सूर्यस्य नलिनीसमाना चन्द्रस्य कलावत् नारायणस्य लक्ष्मीवद् अम्बुधरस्य सौदामिनीवद् अर्थाद् विद्युद्वत् शुद्धोदनस्य मायाख्या कृताभिषेका महिषी आसीत्। अत्र पद्यस्यान्वयेन एवार्थप्रतीतिः सद्यो जायते इत्यतः प्रसादगुणलक्षणं सुसंघटते।

➢ **सन्दर्भग्रन्थसूची-**

१. **अमरकोषः**।सम्पा.डा.ब्रह्मानन्द त्रिपाठी। चौखम्बा सुरभारती प्रका-शन, वाराणसी, संस्करण-२०१५

२. **अलङ्कारशास्त्र की परम्परा।डा.** राजवंशसहायः'हीरा'।चौखम्बा-प्रकाशनम्, वाराणसी
३. **अलङ्कारसर्वस्वम्।** रुय्यकः। निर्णयसागरः, मुम्बई, सं- १८९३
४. **अष्टाध्यायी।** पाणिनिः। व्याख्या. डा. नरेशझा। चौखम्बासुरभारती-प्रकाशनम्, वाराणसी, २०१७
५. **आधुनिक संस्कृत साहित्य का इतिहास।**वर्धमान महावीर खुला विश्वविद्यालय, कोटा
६. **ईशादि नौ उपनिषद्।शाङ्करभाष्यसमेता।** गीताप्रेस। गोरखपुर-(प्रकाशक एवं मुद्रक), सं.-२०६८
७. **केनोपनिषद्।शाङ्करभाष्यसमेता।** गीताप्रेस। गोरखपुर(प्रकाशक एवं मुद्रक), सं.-२०६८
८. **चित्रमीमांसा। अप्पयदीक्षितः।** सम्पा.कालिकाप्रसादशुक्लः, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी,संस्करणम्-२०१३
९. **चन्द्रालोकः।** जयदेवः। भारतीयविद्यासंस्थानम्, वाराणसी, २००१
१०. **छन्दःप्रकाशः।** सम्पा. डा. ब्रह्मानन्दत्रिपाठी। चौखम्बासुरभारती-प्रकाशनम्, वाराणसी, संवत् २०३५
११. **छन्दोमञ्जरी।** श्रीगङ्गादासः। सम्पा. डा. ब्रह्मानन्दत्रिपाठी। चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, संवत् २०३५
१२. **तैत्तिरीयसंहिता।** गीताप्रेस। गोरखपुर।
१३. **ध्वन्यालोकः।** आनन्दवर्धनः। व्याख्या. रामसागरत्रिपाठी।मोतीलालबनारसीदासः, दिल्ली, संस्करणम्-२०१७

**पाद टिप्पणी**

1 श्लेषः प्रसादः समता माधुर्यं सुकुमारता।
2 अर्थव्यक्तिरुदारत्वमोजः कान्ति समाधयः॥ का.सू.३.१-२
3 माधुर्यौजः प्रसादाख्यास्त्रयस्ते न पुनर्दश। का.प्र.- ८.८९
4 का.प्र.- ८.९६
5 का.प्र.- ८।३
6 का. प्र.- ८।४
7 सा.द.- ८।२ पूर्वार्धम्
8 का.प्र.- ८।९
9 सा.द.- ८।३-४
10 सि.- १।४
11 सि.- १।३६
12 का.प्र.- ८।४
13 तत्रैव- ८।५
14 सा.द.- ८।४
15 का.प्र.- ८।१०
16 सा.द.- ८।५-७
17 सि.- १०।५
18 सि.- १०।६
19 का.प्र.- ८।५-६
20 सा.द.- ८।७-८
21 का.प्र.- ८।११
22 सा.द.- ८।८
23 सि.- १।५१